श्री दुर्गा स्तोत्रं (शिवरहस्ये)

श्री दुर्गा स्तोत्रं (शिवरहस्ये)

दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः प्रियां |
सर्वलोकप्रणेत्रीं च प्रणमामि सदाशिवां || 1 ||

मंगळां शोभनां शुद्धां निष्कळां परमां कलां |
विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्यहं || 2 ||

सर्वदेवमयीं देवीं सर्वरोगभयापहां |
ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमां || 3 ||

विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं |
योगिनीं योगमातां च चंडिकां प्रणमाम्यहं || 4 ||

ईशानमातरं देवीमीश्वरीमीश्वरप्रियां |
प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीं || 5 ||

य इदं पठते स्तोत्रं शृणुयाद्वापि यो नरः |
स मुक्तः सर्वपापैस्तु मोदते दुर्गया सह || 6 ||

इति शिवरहस्ये श्री दुर्गा स्तोत्रं |